अर्जुन उवाच

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ ३.१॥

'एषा तेऽभिहिता साङ्ख्ये' (२-३९) इत्यन्तेन 'न त्वेवाहं' (२-२) इत्यादिना ग्रन्थेन जीवेश्वरस्वरूपमुक्त्वा,
तज्ज्ञानोपायं च 'योगेत्विमां श्रृण्वि'ति (२-३९) प्रतिज्ञापूर्वं 'त्रैगुण्यविषया वेदा' (२-४५) इत्यादिनोक्त्वा
'कर्मजं बुद्धियुक्ता हि' (२-५१) इत्यादिना किंचित्प्रपञ्चनं तस्य कृतं पूर्वाध्याये ।अत्र तु पूर्वोक्तस्यैव निवृत्तकर्मरूपज्ञानोपायशब्दितयोगस्यावश्यकार्यतया ज्ञापनरूपं प्रपञ्चनं प्राचुर्येण क्रियत इति पूर्वोत्तराध्याययोः पौर्वापर्यं ध्येयम् । 'दूरेण ह्यवरं कर्म' (२-४९) इत्युक्ते लब्धावसरः पृच्छति
॥ ज्यायसी चेति । 'दूरेण ह्यवरं कर्म बुद्धियोगात्, कृपणाः फलहेतवः' (२-४९) इत्यादिनोक्तदिशा बुद्धिः
कर्मणः सकाशात् ज्यायसी चेत् श्रेष्ठा यदि ।हे जनार्दन ते तव मता तत् तर्हि कर्मणि किं किमर्थं मां नियोजयसीत्येकः प्रशनः ।तत्रापि घोरे रागद्वेषाद्युपेते युद्धाख्ये कर्मणि किमर्थं नियोजयसीत्यन्यः । अयं भावः ।'सर्व एते पुण्यलोका भवन्ती' इत्यादिफलश्रवणेन सर्वकर्मणां 'हतो व प्राप्स्यसि स्वर्गं' (२-३७)
इत्यादियुद्धस्यापि काम्यत्वातेषां च बुद्धियोगादवरत्वात्, यत्याश्रमविहितानां शमादीनां फलश्रवणेनाकाम्यत्वात्, 'शान्तो दान्त' इत्युपक्रम्यात्मानं पश्येदिति ज्ञानार्थत्वश्रवणाच्च यत्याश्रमं स्वीकृत्य तद्धर्मनिष्ठो भवेत्येव नियोक्तव्यम् ।न तु काम्यकर्मणि युद्धे युद्धयस्व भारतेति नियोजनं युक्तमिति ।अत्र केशवशब्दार्थ उक्तः प्रथमाध्याये ।न जायते अर्दयति च संसारमिति दशमभाष्ये ।नञः परनिपातः अत एव नलोपाभावः । उत्तरपदे परतः तस्य स्मरणात् इति तट्टीकोक्तदिशा च जनार्दनशब्दार्थो ध्येयः इति ॥३.१॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ ३.२॥

ननु 'बुद्ध्यायुक्तो यया पार्थ कर्मबन्धं प्रहास्यसीति' (२-३९) बुद्धिपदोक्तयुद्धाख्यकर्मणोऽपि

ज्ञानार्थत्वमुक्तमिति चेत् ।तर्हि व्यामिश्रेण क्वचित्कर्मप्रशंसा क्वचिज्ज्ञानप्रशंसेत्येवम्, यद्वा युद्धस्य क्वचित्स्वर्गार्थत्वं क्वचिज्ज्ञानार्थत्वमित्येवं व्यामिश्रेण सन्देहोत्पादकेन वाक्येन मे बुद्धिं मोहयसीव डोलायमानां करोषीव ।यदि कामिनो युद्धं स्वर्गार्थं अकामिनो ज्ञानार्थं इति चेत्तथाऽपि यतिधर्म एव नियोगो युक्तो न तु वैकल्पिके युद्धे ।अतो येनाहं श्रेयोऽवाप्नुयां, तदेकं निश्चित्य वदेति ॥ ३.२॥

श्रीभगवानुवाच

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ ३.३॥

यद्यपि सर्वकर्माण्याश्रमत्रयविहितानि काम्यकामिभेदेन काम्यान्यकाम्यानि चेति वैकल्पिकानि ।यतिधर्मास्तु शमाद
केवलमकाम्याः युद्धकर्मेव नरकाद्यनर्थहेतुरागद्वेषाद्युपेताश्च न भवन्ति, तथाऽपि तेषां अनाधिकारिकविषयत्वात्, तव च जनकप्रियव्रतादेरिव आधिकारिकत्वात् ।'सुखदुःखे समे कृत्वा' (२-३८)
इत्यत्रोक्तदिशा भगवद्भक्त्या स्वधर्मत्वेनानुष्ठाने पापानवाप्तेर्वैकल्पिकेऽपि युद्धकर्मण्येव नियोज्य इति भावेनाद्यप्रश्नस्योत्तरमाह ॥लोक इत्यादिना ।द्वितीयस्य तु श्रेयानित्यादिनाऽग्रे ध्येयम् ।अस्मिन्लोके साधकवर्गे निष्ठा स्वरूपेण स्थितिः मुक्तिरितियावत् ।यद्वा निष्ठा नितरां संसारगतिनिवृत्तिर्द्विविधा द्विप्रकारा द्विविधसाधनसाध्येत्यर्थः ।पुरा मया प्रोक्ता ।हे अनघेति सम्बुद्धिः ।कथमित्यत आह ।साङ्ख्यानां ज्ञानप्रधानानां देवानां सनकादियतीनां च ।ज्ञानयोगेन, प्राचुर्याज्ज्ञानस्योक्तिः ।
अप्रचुरकर्मोपेतप्रचुरज्ञानोपायेन जपध्यानादिना निष्ठा मुक्तिः, योगिनां कर्मरूपोपायवतां कर्मयोगेनाप्रचुरज्ञानोपेतेन प्रचुरकर्मोपायेन निष्ठा मुक्तिः ।योगिनामित्यनन्तरमितिशब्दोऽध्याहार्यः ।अत्र भगवज्ज्ञानिनामप्युभयेषां न ज्ञानमात्रेण स्वयोग्ययावदानन्दानुभवरूपसम्पूर्णमुक्तिः अपि तु कर्मसमुच्चितेनैव ।तत्र केचन सनकादयो यतयः स्वगतज्ञानकर्मणोर्मध्ये ज्ञानप्रचुराः सन्तो मुक्तिभाजः ।केचित्तु जनकप्रियव्रतादयो गृहस्थाः स्वगतज्ञानकर्मणोर्मध्ये प्रचुरकर्माणः सन्त एव मुक्तिभाजो भवन्ति ।आधिकारिकतया तथैव भगवता क्लृप्तत्वात् ।तथा च त्वमप्याधिकारिक इति कर्मणि विनियोज्य एवेति भावः ।अत्र नीरमिश्रक्षीरे क्षीरशब्दप्रयोगवत्प्राचुर्याभिप्रायेण ज्ञानयोगेन कर्मयोगेनेत्येकैकोक्तिरिति ज्ञेयम् ॥ ३.३॥

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ३.४॥

यतिधर्माः शमादय एवानुश्ठेयाः न तु गृहिधर्माः ।तत्रापि न घोरं युद्धकर्मेति वादिनं पार्थं प्रति तव जनकादेरिवाधिकारिकत्वात् वर्णाश्रमोचिता, धर्मास्त्वयाऽनुश्ठेया एवेत्युक्तम् ।इदानीं कर्म न कार्यमिति वदतः किं कर्माकरणप्राप्यत्वहेतुना मुक्तेर्नैष्कर्म्यशब्दवाच्यत्वात्तदन्यस्याऽनुपपत्त्या कर्म न कार्यमित्यभिप्रायः । उत कर्मणः संसारबीजत्वात्तदकरणं मुक्तिहेतुरिति ।'कर्मणा बध्यते जन्तुरि' ति स्मृतेः कर्मणो मुक्तिप्रतिबन्धकत्वाद्वा ।आद्यं निराह ॥नेति ।कर्मणामनारम्भादकरणान्नैष्कर्म्यं कर्माकरणप्राप्यत्वहेतुना नैष्कर्म्यशब्दवाच्यं मोक्षमश्नुत इति यत्त्वयोक्तम्, तन्न भवति ।कुत इत्यत उक्तम् ॥पुरुष इति ।पुराणि शरीराणि सरति प्राप्नोतीति पुरुसः ।पुरुस एव पुरुषः । हेतुगर्भमिदम् ।सदा सूक्ष्मेण स्थूलेन वा देनेन

युक्तत्वादिति ।कर्माकरणमात्रेण मोक इति पक्षे कदाचित्कर्मानधिकारि (र)शरीरस्यापि सम्भवेन तद्देहे कर्माकरणनिमित्तमोक्षप्राप्त्याऽधुना दृश्यमानं पुरुषत्वं न स्यादिति भावः ।नैष्कर्म्यशब्दवाच्यत्वं तु काम्यकर्माप्राप्यत्वनिमित्तेनोपपन्नम् ।मया तु निवृत्तकर्मण्येव नियोगः क्रियत इति भाटअः ।द्वितीयमपि निराह ॥ नेति ।कर्मणामनारम्भादकरणान्नैष्कर्म्यं काम्यकर्माप्राप्यं मोक्षमश्नुते, संसारबीजभूतकर्माभावादिति त्वयोक्तं यत्तन्न ।कुतः पुरुष इति ।प्राग्वदेवार्थः ।अनादौ संसारे कर्माधिकृतानन्तजन्मसम्भवेन सदा पुरुषशब्दितदेहयुतत्वात्तत्र कृतानन्तकर्मणां भावेनाद्यतनदेहावच्छेदेन कर्माकरणमात्रेण संसारबीजाभावकृतमोक्षाशा कुतः स्यादिति भावः ।तृतीयपक्षनिरासस्तु 'यज्ञार्थात्कर्मणोऽन्यत्र' इत्यादौ वक्ष्यते । ननु 'निष्कामं ज्ञानपूर्वं तु' इति स्मृतौ निवृत्तकर्मणा(णो) मोक्ष उच्यते ।तस्य मोक्षहेतुत्वे फलान्तराभाव एव युक्तिर्न त्वन्या ।तथा च कर्माकरणस्यापि फलान्तराभावरूपयुक्तिसाम्यात्, आयासाभावरूपगुणवत्त्वाच्च, कर्माकरणादपि मोक्षः स्यात् ।'एवं त्वयि नान्यथेतोऽस्ती' त्यादौ श्रुतः कर्माकरणे प्रत्यवायस्तु अमुमुक्षुविषतयोपपन्न इत्यत आह ॥न चेति ।सन्न्यसनात् काम्यकर्माकरणादेव, तन्मात्रादिति यावत् ।अनेन निवृत्तकर्मकरणमुपलक्ष्यते ।निवृत्तकर्मकरणमात्रात्सिद्धिं मोक्षं पुरुषो न समधिगच्छति न प्राप्नोति । किन्तु तेनान्तःकरणशुद्धिविषयवैराग्यश्रवणमननध्यानज्ञानद्वारैव ।'निवृत्तं सेवमानस्तु ब्रह्माभ्येती' ति श्रु(स्मृ)तेरप्ययमेवाभिप्रायः ।तथा च न तत्प्रतिबन्द्या कर्माकरणस्य मोक्षहेतुत्वं शङ्क्यमिति भावः । ननुयत्याश्रमधर्माणां श्रुत्यादिसिद्धे मुक्तिहेतुत्वे फलान्तराभाव एव युक्तिरिति तत्प्रतिबन्द्यास्तु कर्माकरणस्य मुक्तिहेतुत्वमित्यतोऽप्युक्तम् ।न चेति ।सन्न्यसनाद्यत्याश्रमादेवेत्यर्थः ।स तु भगवति मनःसमाधानद्वारा (तत्प्रीतिविशेषद्वारा वा) मुक्तिहेतुर्न फलान्तराभावत्वहेतुना ।येन तत्प्रतिबन्द्याऽपि फलान्तराभावयुक्त्या कर्माकरणस्य मुक्तिहेतुत्वं शङ्क्येतेति ।एतेन लोक इति पूर्वश्लोकोक्तदिशा न केवलमाधिकारिकत्वात्तव कर्मणि नियोगः, अपि तु कर्माकरणस्य त्वदुक्तरीत्या मुक्तिहेतुत्वाभावादपीति हेत्वन्तरमुक्तं भवति ॥३.४॥

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥३.५॥

किञ्चकर्मणेत्यादिस्मृतिबलात् कर्मणोमुक्तिप्रतिबन्धकत्वमिति तृतीयपक्षे स्मृतौ कर्मशब्दः सङ्कुचितवृत्तिरिति वक्ष्यमाणोपोद्घाततया कर्माणि सर्वात्मना त्यक्तुं न शक्यानीत्याह ॥न हीति ।जातु कस्याञ्चिदवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञोऽज्ञो वा अकर्मकृत्कर्माण्यकुर्वन्न तिष्ठति ।कुत इत्यत उक्तम् ।कार्यत इति ।सर्वः सर्वेण जनेन व्यत्यायात् ।अवशः अवशेन 'अः इति ब्रह्म' (ऐ.आ. २.३.८) इति श्रुतेः ।विष्णुवशेनैव सता स्वतन्त्रकर्तृविष्ण्वधीनकर्तृताकेनैव (सता) कर्त्राप्रकृतिजैर्गुणैः सत्त्वादिभिर्विकार (कर्तृ) भूतैः कर्म कार्यते ।स्वतन्त्रकर्त्रा भगवता विकारकर्तृसत्त्वादिभिश्च प्रेरितो जनः सदा किञ्चित्कर्म करोतीति हेतोरकर्मकृत्कोऽपि नेत्यर्थः ॥३.५॥

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥३.६॥

यस्त्विन्द्रियाणि मनसा नियम्याऽरभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥३.७॥

ननु शरीरयात्राद्यर्थकर्मणां त्यक्तुमशक्यत्वेऽपि यज्ञादिकर्मणां त्यक्तुं शक्यत्वात्तेषामस्तु त्यागः ।न ह्यशक्यविषये शास्त्र प्रवृत्तिरस्ति ।अतः 'कर्मणा बध्यत' इति कर्मत्यागपरे शास्त्रे कर्मशब्दो

यज्ञादिकर्मपरो भविष्यतीत्यतो मन एव बन्धमोक्षयोः प्रयोजकं न कर्मकरणाकरणे इति भावेन मनस एव प्राधान्यमाह ॥कर्मेत्यादिश्लोकाभ्यां ।कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि ।चक्षुरादीन्युपलक्ष्यन्ते ।संयम्य निगृह्य यो मनसा इन्द्रियार्थान्रूपादीन्मनसा स्मरन्नास्ते वर्तते ।स विमूढात्मा भ्रान्तः मिथ्याचारः कपटाचारः डाम्भिक उच्यत इत्यर्थः ।यस्त्विन्द्रियाणि चक्षुरादिज्ञानेन्द्रियाणि मनसा नियम्य असक्तः फलेच्छाहीनः सन् कर्मेन्द्रियैःकर्मयोगं स्ववर्णाश्रमोचितकर्मरूपज्ञानोपायं आरमते करोति स विशिष्यते ।पूर्वतनादधिको भवति ।एतेन पूर्वश्लोके मनसो निग्रहाभावे बन्ध इत्यन्वयः, द्वितीये तु मनसो निग्रहे बन्धाभाव इति व्यतिरेक उक्तः ।तथा पूर्वत्र मनसोऽनिग्रहे मोक्षाभाव इति व्यतिरेकः, द्वितीये तु श्लोके मनसोनिग्रहे मोक्ष इत्यन्वय इति बन्धापेक्षया मनसोऽनिग्रहनिग्रहयोरन्वयव्यतिरेकौ, मोक्षापेक्षया च व्यतिरेकान्वयावित्युक्तदिशाऽभिप्रेततया बन्धमोक्षयोर्मनोऽनिग्रहनिग्रहावेव प्रयोजकावित्युक्तं भवति ।मनस एव प्रयोजकत्वज्ञापनाय मनसा स्मरन्नित्युक्तिः ।अन्यथा स्मरणस्य मानसत्वाव्यभिचारान्मनसेति व्यर्थं स्यादिति ज्ञेयम् ॥३.७॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः ॥३.८॥

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥३.९॥

ततः किमित्यत आह ॥नियतमिति ।हि यस्मादकर्मणः कर्माकरणात्कर्मानुष्ठानंज्यायः प्रशस्ततमम् ।अतो नियतं वर्णाश्रमोचितं कर्म कुरु ।किञ्चाकर्मणः कर्माकुर्वतः ते तव शरीरयात्राऽपि देहनिर्वाहोऽपि न प्रसिद्ध्येदित्यर्थः ॥३.८॥

'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।तस्मात्कर्म न कुर्वंति यतयः पारदर्शिन ॥' इति स्मृतेर्मुक्तिप्रतिबन्धकत्वात्कर्म न कार्यमिति प्राग्विकल्पितं तृतीयं पक्षं निराह ॥यज्ञार्थादिति ।यज्ञो विष्णुः 'यज्ञो वै विष्णुरिति' श्रुतेः ।तदर्थात् विष्णवर्थात् ।यद्वा जानातीति ज्ञः ।'इगुपधज्ञाप्रीकिरः कः' स्वपरगताशेषविशेषज्ञत्वात्, ज्ञो विष्णुः ।येनोद्देशेन यातो विषयीकृतः स उद्देशो यज्ञः ।
विष्णु विषयोद्देशार्थात्कर्मणोऽन्यत्र विष्णवन्यविषये विष्णूद्देशादन्योद्देशविषये वा ।अयं लोको जनः कर्मबन्धनः ।'कृत्यल्युटो बहुलमि' इति कर्तरि ल्युट् ।कर्म बन्धनं बन्धकं यस्य स कर्मबन्धनः ।
अवैष्णवकर्मैव प्रतिबन्धकं न वैष्णवं कर्म ।'कर्मणेति' स्मृतौ कर्मपदमवैष्णवकर्मपरं न तु कर्ममात्रपरम् ।अत एव प्राक् 'न हि कश्चिदिति' श्लोके कर्मणेति स्मृतिबलात्कर्मपात्रं न करोमीति त्वया वक्तुमशक्यम् ।स्मृतौ कर्मपदस्य सङ्कोचस्त्वयाऽप्यभ्युपेय इति भावेनाकर्मकृत्कोऽपि नास्ति ।सदा भगवदादिप्रेरितः (किञ्चित् कर्म) कुर्वन्नेव सर्वोऽप्यास्ते इत्यसङ्कुचितवृत्तित्वे बाधकमुक्तम् ।तथा शरीरयात्राऽपीत्यत्रापि देहनिर्वाहाभावो बाधक उक्तः ।अतस्तदर्थं भगवत्पूजार्थं मुक्तसङ्गः फलकामनाहीनः सन्कर्म समाचर कुर्विति ॥३.९॥

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥३.१०॥

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥३.११॥

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ ३.१२॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ ३.१३॥

वर्णाश्रमोचितकर्मणः सर्वथा कर्तव्यत्वे स्तुतिनिन्दापरकृतिपुराकल्परूपार्थवादं चाह ॥सहेत्यादिचतुर्भिः श्लोकैः ।यज्ञैः सह वर्तन्त इति सहयज्ञाः ब्राह्मणादिप्रजाः पुरा सर्गादौ सृष्ट्वा प्रजापतिरुवाच । किमुवाचेत्यत आह ॥अनेनेत्यादिना कारणादित्यन्तेन ।हे प्रजाः अनेन यज्ञेन यूयं प्रसविष्यध्वम् ।इष्टकामानिति शेषः ।स्वस्वाभिमतपुमर्थान्सम्पादयत ।एष यज्ञः वो युष्माकमिष्टकामधुक् ।कामा भोगाः तान्दोग्धीति कामधुक् ।इच्छाविषयभोगप्रदोऽस्तु ॥३.१०॥कथमिष्टकामदोग्धृत्वं यज्ञस्येत्यत आह ॥देवानिति । हे प्रजाः अनेन यज्ञेन यूयं देवान् भावयत ।सम्भावयत, हविर्भिः तर्पयत ।ते हविरादिभिस्तृप्ता देवा वो युष्मान् भावयन्तु ।इष्टकामदानेन तर्पयन्तु ।एवमन्योन्यं भावयन्तो देवाश्च यूयं च परं श्रेयो मोक्षाख्यमवाप्स्यथ ॥३.११॥एतदेव स्पष्ट (यन्) यितुं कर्माकरणे दोषमाह ॥इष्टानिति ।यज्ञैर्भाविता देवा वो युष्मभ्यं इष्टान् भोगान्दास्यन्ति ।तैदेवैर्दत्तान्नादींस्तेभ्यो यज्ञादिभिरप्रदाय यो भुङ्क्ते सः स्तेन एव चोर एव ॥३.१२॥एवमयजतो विनिन्द्य यजतः स्तौति ॥यज्ञेति ।विष्णुतदितरदेवाराधनावशिष्टभोजिनः सन्तः सर्वकिल्बिशैः पापैः मुच्यन्ते ।यद्वा वैष्वदेवादियज्ञावशिष्टभोजिनः सन्तः सर्वकिल्बिषैः "खण्डनी पेषणि चुल्ली उदकुम्भी च मार्जनी ।पञ्चसूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ॥ " इत्युक्तपञ्चसूनाकृतदोषैर्मुच्यन्त इत्यर्थः ।पुनरयजतो निन्दति ॥भुञ्जत इति ।आत्मकारणात्स्वार्थमेव ये पचन्ति ते पापाः अधमेव अधनिमित्तमेव भुञ्जते तद्भोजनं पापहेतुरेवेत्यर्थः ।इति प्रजापतिरुवाचेति इतिशब्दो योज्य ॥ ३.१३॥

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ ३.१४॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ ३.१५॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ ३.१६॥

वर्णाश्रमोचितकर्मणः सर्वथा कर्तव्यत्वे स्तुत्याद्यात्मकार्थवादं चतुर्भिरुक्त्वा, अधुना जगच्चक्रप्रवर्तकत्वरूपं हेत्वन्तरं विपक्षेऽनर्थोक्त्याऽऽह ॥अन्नादित्यादित्रिभिः श्लोकैः ।अन्नाद्भूतानि भवन्ति, रेतोद्वारा प्राणिनौत्पद्यन्ते ।पर्जन्यादादित्यादन्नसम्भवः वृष्टिद्वारा अन्नस्योत्पत्तिः ।पर्जन्यो मेघचक्राभिमानी आदित्यः यज्ञाद्भवति ।यज्ञशब्दोऽत्राज्यादिहविःपरः ।यजमानदत्तानां (दत्तेन) आज्यादि हविषामुपभोजनेनादित्यस्य बालाद्युपचयान्निमित्तादुपचारेण "यज्ञाद्भवति पर्जन्य" इत्युच्यते ।यद्वा पर्जन्यशब्देनादित्याभिमन्यमानं मेघचक्रमेव लक्षणया वा, 'जननात्परसस्यादेः पर्जन्यो मेघसन्ततिरिति' (नारदीये) स्मृत्युक्तयोगवृत्त्या वा ग्राह्यम् ।तच्च यज्ञाद्भवति ।हविर्भागेन परितुष्टादादित्यादुत्पद्यते ।'अग्नौ

प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।आदित्याज्जायते वृष्टिः’ (नारदीये) इत्यादेः ।वृष्टिर्वार्षिकमेघचक्रं जायत इत्यर्थः ।यज्ञोदेवतोद्देशेन द्रव्यत्यागरूपो ज्योतिष्टोमादिः कर्मसमुद्भवः ।तदङ्गक्रिययोत्पद्यते ॥३.१४॥ कर्म ब्रह्मोद्भवं परब्रह्मजन्यं विद्धि जानीहि ।ब्रह्म परब्रह्म चाक्षरसमुद्भवम् ।अक्षरशब्दितवेदाभिव्यङ्ग्यम् । वेदेन यथावदवगतमेव ब्रह्म सत्कर्म कारयतीति भावः ।तानि चाक्षराणि भूतव्यङ्ग्यानीति शेषोक्त्या चक्रं ध्येयम् । तस्मादुक्तपरम्परया यज्ञाभिव्यङ्ग्यत्वात्सर्वगतं ब्रह्म ”नित्यं यज्ञे प्रतिष्टितम्” इत्युच्यते ।एवं च भगवतो यज्ञे प्रतिष्ठितत्वात् यज्ञानुष्ठानेन चक्रप्रवृत्तौ भूतस्थितिहेतुत्वनिमित्तसुकृतमिव भगवदभिव्यक्तिनिमित्तं च सुकृतं भवतीति भावः ॥३.१५॥ एवं पुरातनई प्रवर्तितं भगवतैव वा प्राणिनामिष्टसिद्धये प्रवर्तितं जगच्चक्रं इह लोके यो नानुवर्तयति कर्म न करोतीति यावत् ।विश्वस्य चक्रेङऽन्तर्भावात् कर्माकरणेन (कर्माकरणे) चक्राप्रवृत्तौ चक्रविनाशकत्वेन विश्वहन्तृत्वात् स अघायुः । तादर्थ्यात्ताच्छब्द्यं ।अघनिमित्तमायुर्यस्य स तथा ।इन्द्रियारामः इन्द्रियैर्विषयेषु रतिमान् ।हे पार्थ, व्यर्थमेव जीवति नरके मज्जतीत्यर्थः ।यज्ञदानतपोरूपत्रिविधकर्मणां गृहस्थानामिव ब्रह्मचर्याद्याश्रमत्रयस्यापि विद्यादानाभयदानस्वभोक्तव्यान्नदानस्य च तथाऽध्ययनप्रवचनध्यानादि रूपवाचिकमानसिकयज्ञस्य तथा कृच्छ्रचान्द्रायणादितपसः सत्वेन तेषामपि चक्रप्रवर्तनसम्भवो ज्ञेयः । उक्तं हि ”वाचिको मानसो यज्ञो न्यासिनां तु विशेषत” इत्यादि (नारदीये) ॥३.१६॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥३.१७॥

एवं ’न कर्मणामनारम्भात्’ इत्यादिना ’सह यज्ञा’ इत्यादिना चोक्तदिशा कर्माकरणतत्करणयोर्हानिलाभौ चेत्तर्हि परमेश्वरे असम्प्रज्ञातसमाधिरूपं मनःसमाधानमपि न कार्यं प्रसज्येत ।तत्र कर्मलोपस्यावश्यकत्वादित्यत आह ॥यस्त्विति ।तुशब्दः समाधिस्थत्वविशेषसूचकः ।यस्त्वसम्प्रज्ञातसमाधिस्थः मानवोऽपरोक्षज्ञानी । मनुतेरवण् ।आत्मरतिरेव ।अत्रात्मशब्दः सर्वोऽपि परमात्मपरः ।आत्मनि आत्मनो वा रतिमान्दर्शनजन्यसुखवा परमात्मविषयकदर्शनजन्यसुखवानेव न त्वन्यत्र रतिमानित्येवकारार्थः ।भगवतोऽन्यत्र रतिराहित्यं न प्रायेणेति मन्तव्यं किन्तु सर्वात्मनेत्याह ॥आत्मतृप्त इति ।आत्मना तृप्तः परमात्मप्रसादेनैव ।तदन्यत्र सर्वात्मनाऽलम्बुद्धिमानित्यर्थः ।अन्यत्रालम्बुद्धिरपि भगवत्प्रसादायत्तेति भावः ।किञ्चातिशयितं सुखं दत्वा भगवानन्यत्र सर्वात्मनाऽलम्बुद्धिमुत्पादयतीत्यतोऽन्यत्रालम्बुद्धौ हेतुतया प्रागुक्तरत्याख्यमेव सुखमाह ॥ आत्मन्येव च सन्तुष्ट इति ।सम्यक् तुष्टिमान् सन्तुष्टः महासुखवानित्यर्थः ।हेतुगर्भमिदम् । भगवद्दर्शननिमित्तकमहासुखवत्त्वादन्यत्रालम्बुद्धिमानिति ।भगवद्दर्शननिमित्तकं महासुखं केन हेतुना स्यादित्यतस्सन्तुष्टत्वे हेतुरात्मन्येवेति ।अधिकरणसप्तमी ।आत्मनि स्थित एव सन्सन्तुष्ट इति । असम्प्रज्ञातसमाधिरूपयाऽऽत्मनि स्थित्यैव सन्तुष्टो न त्वन्येन केनापीत्येवकारार्थः ।अत्र मानव इति उक्तिः अपरोक्षिण एवासम्प्रज्ञातसमाधिरिति द्योतयितुम् ।यस्त्वेवंरूपः तस्य कार्यं कर्तव्यं संध्यावन्दनादिकं किमपि कर्म न विद्यते ॥३.१७॥

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥३.१८॥

ननु कर्मकरणाकरणयोर्लाभहानी चेत्तर्हि समाधिर्न कार्यः प्रसज्येतेति चोदिते समाधिस्थस्य कार्यं न विद्यते इत्युत्तरं कस्मादुक्तम् ।कर्मकृतिकाले त्वयाऽहमुद्बोधनीय इति कञ्चित्प्रत्युक्त्वा समाधौ स्थितः सन् तेन योगशास्त्रोक्तैरुपायैरुद्बोधितः कर्म करोतीत्येवोत्तरं कुतो नोक्तमित्यत आह ॥नैवेति ।तस्यासम्प्रज्ञातसमाधिस्थस्य

समाधिं विनेह कृतेन यज्ञादिकर्मणाऽऽत्मरत्याधिकस्तत्समो वाऽर्थः पुमर्थोनास्ति ।ननु यज्ञादिकरणार्थं उत्थानाभावेऽपि नित्यनैमित्तिककर्माकरणे प्रत्यवायात् तत्करणार्थं समाधित उद्बोधनं आवश्यकमित्यत आह ॥ नाकृतेनेति ।तस्य समाधिस्थस्याकृतेन कर्मणा सन्ध्यावन्दनादितत्तत्कालानुष्ठेयकर्माभावेन कश्चन दोष इति शेषः, नास्ति ।ननु समाधिस्थस्याल्पस्य यज्ञादेरनुष्ठाने फलाभावेऽपि सन्ध्याद्यकृतौ प्रत्यवायाभावेऽपि गुरुदेवतादिषु पूजाकरणाकरणयोरर्थप्रत्यवायौ स्यातामेवातस्तत्सन्निधानप्राप्तौ उद्बोधनमावश्यकमित्यत आह ॥ न चेति ।अस्यासम्प्रज्ञातसमाधिस्थस्य ।सर्वभूतेषु ।विषयसप्तमीयम् ।अर्थव्यपाश्रयः अर्थस्य व्यपाश्रयः प्राप्तिः येन दर्शनसम्भाषणपूजनादिव्यापारेण भवति सोऽर्थव्यपाश्रय इति व्यधिकरणबहुव्रीहिः । गुर्वादिविषयकदर्शन (सम)भाषणवन्दनादिव्यापारः पुमर्थप्राप्तिहेतुभूतः समाधिस्थस्य नास्तीत्यर्थः । चशब्दः पूर्वार्धोक्तसमुच्चये ।गुर्वादिविषयव्यापारेणाप्यात्मरतितुल्यं सुखं न लभ्यत इत्यभिप्रायः ।एवं तत्पूजाद्यकरणमपि समाधिस्थस्य नानर्थप्राप्तिहेतुरित्युपलक्ष्यते ।यद्वा न केवलं चक्रप्रवर्तकत्वेन भूतस्तितिहेतुत्वात्कर्म कर्तव्यम् ।किन्तु मुक्तस्यैवाकर्मत्वादमुक्तेनावश्यं कर्म कार्यमिति तस्मादित्यनेन वक्तुं अकर्मत्वं मुक्तस्यैवेत्याह ॥यस्त्विति ।यस्तु मानवः प्राप्तज्ञानफलो मुक्तः आत्मरतिः आत्मना परमात्मना रतिः अभिव्यक्तस्वरूपानन्दो यस्य सः तथा ।आत्मना परमात्मना तृप्तः कृतकृत्यः आत्मतृप्तः आत्मन्येव च सन्तुष्टः प्रीतिमान् ।यद्वा तृप्तिसन्तोषशब्दयोः प्रीतिरूपैकार्थत्वेऽप्यात्मना तृप्तः प्रीतिमान् आत्मन्येव च सन्तुष्ट इत्येव (इत्येतावता) अर्थभेदो ध्येयः ।तस्य तु तस्यैवेति तुशब्दोऽत्र योज्यः ।मुक्तस्यैव कार्यं न विद्यते ।ननु 'कृष्णो मुक्तैरिज्यते वीतमोहैः' इत्युक्तेर्मुक्तस्यापि कर्मकर्तव्यमित्यत आह ॥नैवेति ।प्राग्वदेवार्थः स्वेच्छयैव करणं न विधिबद्धत्वेन ।न वा फलापेक्षया, तस्यैव फलरूपत्वेन फलान्तराभावादिति भावः ॥३.१८॥

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥३.१९॥

तस्मादसम्प्रज्ञातसमधिस्थस्य वा मुक्तस्यैव वाऽकर्मत्वेन त्वादृशेनावश्यं कर्मणः कर्तव्यत्वादसक्तः फलस्नेहरहितः सन् कार्यमवश्यकर्तव्यं कर्म सततं समाचर भगवत्पूजात्वेनानुतिष्ठ ।ननु मुक्तस्य कर्मणा प्रयोजनाभावात् (यथा) कार्याभावः ।एवं मुमुक्षोरपि कर्मणा फलाभावात्कार्याभावः किं न स्यादित्यत आह असक्त इति ।पुरुषः असक्तः कर्माचरन्नेव ज्ञानद्वारा परमाप्नोति हि यस्मात्तस्मान्मुक्तसमाधिस्थाभ्यामन्यस्य कर्मणा फलसत्वादस्त्येव कार्यमिति भावः ॥३.१९॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥३.२०॥

ननु ज्ञानादेव मोक्षसिद्धेः कथं 'असक्तो ह्याचरन्नेवेति' उच्यत इत्यतो मुक्तावानन्दातिशयार्थं विहितकर्मणोऽवश्यकर्तव्यतायां ज्ञानिनामाचारमपि प्रमाणयति ॥कर्मणैवेति ।सहयोगे तृतीया ।जनकादयो जनकप्रियव्रतादयो ज्ञानिनः कर्मणैव कर्मसहिता एव कर्म कुर्वन्त एव संसिद्धिं सम्पूर्णमोक्षमास्थिताः प्राप्ताः । ज्ञानमात्रान्मुक्तिसिद्धावपि तत्रानन्दातिशयार्थं कर्म कुर्वन्तीत्यर्थः ।तृतीयायाः करणार्थत्वेऽपि कर्मणा करणेन संसिद्धिं मोक्षमाप्ता इत्यर्थः ।लाङ्गलेन जीवाम इतिवज्ज्ञानद्वारकत्वाभिप्रायं करणत्वमिति ।यद्वा संसिद्धिं ज्ञानं कर्मणा प्राप्ता इत्यर्थः ।न केवलं ज्ञानिनामाचारात्कर्म कर्तव्यं ।किं त्वीश्वरप्रीतिद्वारा मुक्तिहेतुलोकसङ्ग्रहार्थत्वाच्च कर्म कार्यमित्याह ॥लोकेति ।लोकानामज्ञजनानां कर्मणि प्रवृतिरूपं सङ्ग्रहमेवापि ।न केवलं ज्ञान्याचारमित्यपेरर्थः ।एवकारस्तु तिष्ठतु तावत्कर्मकरणेऽन्यो हेतुरित्यर्थसूचकः ।सम्पश्यन्कर्म कर्तुमर्हसि ।जनस्य कर्मणि प्रवर्तनेन भगवत्प्रीतिः तथा च मोक्षे

सुखातिशयः इति ज्ञेयम् ।तदुक्तं ।'अज्ञानांज्ञानदं कर्म ज्ञानिनां लोकसङ्ग्रहात् ।अद्धैव तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा' इति (कृष्णसम्हितायां) ॥३.२०॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥३.२१॥

कथं कर्मकरणेन लोकसङ्ग्रह इत्यत आह ॥यद्यदिति ।श्रेष्टो महात्मा यत्प्रमाणं कुरुते यद्वाक्यादिकं प्रमाणं सदपि लोके प्रमाणत्वेनानवगतं प्रमाणतया ज्ञापयतीत्यर्थः ।यद्वा यत्प्रमाणमित्येकं पदं बहुव्रीहिः ।यत्प्रमाणं लौकिकं वैदिकं वा कर्म कुरुते तदेव लोकोऽनुवर्तते अनुसरति ॥३.२१॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥३.२२॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥३.२३॥

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥३.२४॥

किञ्च प्रयोजनमात्रहीनेनापि मया केवलानुग्रहेण लोकसङ्ग्रहार्थं कर्म क्रियते मुक्तावानन्दवृद्धिप्रयोजनवता ज्ञानिना तत्कर्तव्यमिति किं वाच्यमिति भावेनाह ॥न म इत्यादि त्रिभिः ॥हे पार्थ मे किञ्चन कर्तव्यं नास्ति । यतस्त्रिषु लोकेषु प्रागप्राप्तं पश्चात्प्राप्तव्यं नास्ति ।तथाऽपि कर्मणि वर्त एव ।कर्म करोम्येव ॥३.२२॥ यदि ह्यहं जातु कदाचिदतन्द्रितोऽनलसः कर्मणि न वर्तेयं न कर्म कुर्यां तर्हि मम वर्त्म मार्गं कर्माकरणरूपं मनुष्याः सर्वशः सर्वेऽपि अनुवर्तन्ते अनुसरेयुः ।मद्दृष्टान्तेन कर्म न कुर्युरित्यर्थः ॥३.२३॥ततः को दोष इत्यत उच्यते ।अहं चेत्कर्म न कुर्यां तदा इमे लोकाः उत्सीदेयुः (नश्येयुः) कर्मलोपेन नरकं प्राप्नुयुः । किञ्च कर्मलोपे सति ब्रह्मक्षत्रादिवर्णविवेको न स्यात् ।अतो वर्णसङ्करस्य च कर्ता स्यां भवेयम् ।एवमहमेव प्रजाः उपहन्यां हतवान् भवेयम् ॥३.२४॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥३.२५॥

ननु अज्ञवदाग्रहेण ज्ञानिनाऽपि कर्म कार्यं चेद्विद्वद्विद्वत्कर्मणोरविशेषप्रसङ्ग इत्यत आह ॥सक्ता इति । हे भारत अविद्वांसोऽज्ञाः कर्मणि सक्ताः अभिनिविष्टाः फलेच्छावन्तः सन्तो यथा कर्म कुर्वति तथा विद्वान् ज्ञान्यपि असक्तः फलेच्छाहीनः सन् लोकसङ्ग्रहं चिकीर्षुः कर्म कुर्यादित्यर्थः ।सक्त्य सक्तिपूर्वकत्वेन कर्मानुष्ठानं तयोर्विषेष इति भावः ॥३.२५॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥३.२६॥

अज्ञानां कर्मणि सक्तिं जनयितुमपि ज्ञानिना कर्म कार्यमित्याह ॥न बुद्धीति ।अज्ञानां भगवत्स्वरूपमजानतां कर्मसङ्गीनां कर्माभिनिवेशिनां बुद्धेर्भेदं विपर्यासं न जनयेत् ।कर्मानुष्ठानाद्बुद्धेश्चालनं न कुर्यात् । विद्वान्युक्तो भगवति मनोयोगवान् तत्पूजात्वेनेति यावत्, कर्म समाचरन् सर्वकर्माणि जोषयेत् ।सेवयेत् अज्ञानिति शेषः ॥३.२६॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥३.२७॥

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥३.२८॥

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥३.२९॥

ज्ञान्यज्ञानिनोः सक्ता इत्यादिश्लोकद्वयोक्तं कर्मानुष्ठानवैलक्षण्यं प्रपञ्चयति ॥प्रकृतेरित्यादिश्लोकत्रयेण । अत्र प्रकृतिशब्देन जीवस्वभावेश्वरजडप्रकृतयो ग्राह्याः ।प्रकृतेः प्रकृष्टकृतिमत्त्वहेतुना प्रकृतिपदवाच्यस्य हरेः गुणैरिच्छाज्ञानप्रयत्नादिरूपगुणैर्धर्मैः स्वतन्त्रैः ।तथा प्रकृतेः उत्तममध्यमाधमरूपजीवराशिस्वभावस्य गुणैरनुगुणैः तत्त्वज्ञानमिश्रज्ञानमिथ्या ज्ञानादिरूपधर्मैरीशाधीनैः । तथा प्रकृतेः जडप्रकृतेः सम्बन्धिभिः गुणैस्तत्कार्यभूतः सत्त्वरजस्तमोगुणैः प्रकृतेर्विकारभूतैर्देहेन्द्रियान्तःकरणरूपगुणैः क्रियमाणानि कर्माणि साधुकर्ममिश्रकर्मासाधुकर्माणि प्रति अहङ्कारविमूढात्मा सन् कर्ताऽहं स्वतन्त्रकर्ताऽहमिति मन्यते ।ईश्वरः स्वतन्त्रकर्ता सन् स्वज्ञानेच्छादिना स्वाधीनकर्त्रा त्रिविधजीवस्वभावमनुसृत्य प्रकृतिविकारजीवकरणैः प्रकृतिकार्यसत्त्वादिगुणरूपोपादानकारणेन कर्म कारयति ।तत्क्रियमाणकर्मणामहमेव स्वतन्त्रकर्तेत्यात्मानं अज्ञो जनो मन्यत इत्यर्थः ॥३.२७॥ एवमविद्वान्करोति चेत् विद्वान्कथमित्यत आह ॥तत्त्वविदिति ।गुणकर्मविभागयोः गुणानमिच्छादिभगवद्गुणानां सत्त्वादिप्रकृतिगुणानां प्रकृतिविकारतया प्रकृत्युपसर्जनभूतचक्षुरादीन्द्रियशरीरमनसां चान्योन्यमुक्तविधया विभागस्य तथा कर्म च स्वतन्त्रभगवत्कर्तृकं तदायत्तजीवकर्तृकं विकाररूपप्रकृतिकर्तृकं चेति कर्मविभागस्य तत्त्ववित्तु तत्त्वज्ञानी तु गुणा भगवदिच्छादयः गुणेषु जीवस्वभावकर्मादिषु प्रेरकत्वेन वर्तन्ते ।भगवदिच्छाद्यनुसरेण च गुणा इन्द्रियाणि गुणेषु शब्दादिविषयेषु वर्तन्ते ।अतो जीवस्य न क्वापि स्वातन्त्र्यमिति मत्वा न सज्जते ।स्वात्मनः कर्तृत्वाभिमानेन संसारमग्नो न भवतीत्यर्थः ॥३.२८॥स्वात्मनः स्वतन्त्रकर्तृतां मन्यमानाः अविद्वांसः ज्ञानिना बोधनीया इत्यत आह ॥प्रकृतेरिति । प्रकृतेरीश्वरस्येच्छादिगुणैः कर्तृभूतैः ।प्रकृतेर्जडस्य कार्यभूतसत्त्वादिगुणैर्निमित्तैः प्रकृतेर्जडस्य विकारभूतगुणेष्विन्द्रियेषु सम्मूढाः ममैवैतानि करणानि इति तेषु स्वातन्त्र्याभिमानिनः अत एव गुणकर्मसु गुणेषु शब्दादिविषयेषु सज्जन्ते स्नेहातिशयवन्तो भवन्ति, स्वकर्मसु च सज्जन्ते स्वातन्त्र्यभ्रमवन्तो ये तानकृत्स्नविदः गुणकर्मविभागाज्ञान्मन्दानयोग्यजनान् स्वयं कृत्स्नविज्ज्ञानी न विचालयेत् ।गुणकर्मसु सङ्गं त्याजयित्वा सन्मार्गे न प्रवर्तयेदिर्यर्थः ।'शब्दाद्या इन्द्रियाद्याश्च सत्त्वाद्याश्च शुभानि च' इत्यादेः गुणशब्दोऽनेकार्थो ध्येयः ॥३.२९॥

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।

निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३.३०॥

एवमविद्वत्कर्मणोविद्वत्कर्मणोऽनभिमानेनानुष्ठानरूपवैलक्षण्य मुक्त्वेदानीं तवापि ज्ञानित्वात्तथैवानुष्ठेयं कर्मेत्याह ॥मयीति ।अध्यात्मचेतसा आत्मानं परमात्मानं मामधिकृत्य स्थितमध्यात्मं, अध्यात्मं च तत् चेतश्च तदध्यात्मचेतः तेनेति वा ।अधि अधिकं स चासावात्मा चाध्यात्मा ।अध्यात्मनि चेतोऽध्यात्मचेतः तेनेति वा ।सर्वाधिकपरमात्मभूतमन्निष्ठमनसा निराशीः विष्णुभक्तिज्ञानाद्यन्यकामरहितः निर्ममः कर्मण्यहमेव स्वातन्त्र्येण करोमीति स्वतन्त्रकर्तृताऽभिमानहीनो भूत्वा सर्वाणि कर्माणि मयि सन्यस्य भगवान् कृष्ण एव मयि स्थित्वा सर्वकर्माणि करोतीति ज्ञात्वा तानि च श्रीकृष्णपूजारूपाणीति मयि समर्प्य विगतज्वरः त्यक्तशोकः सन् युध्यस्वेति ।तदुक्तं ।'नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलं' (ब्रह्मतर्के) इत्यादि ॥३.३०॥

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३.३१॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३.३२॥

विद्वांस एवं कर्म कुर्वन्तीत्येतावता मयाऽप्युक्तविधया कर्म कार्यमिति कुत इत्यतः स्वोक्तस्य करणे अकरणे च फलमाह ॥ये म इत्यादिश्लोकद्वयेन ।ये मानवाः श्रद्धावन्तः मद्वाक्येष्वास्तिक्यबुद्धिमन्तः, अनसूयन्तः कष्टे कर्मणि प्रवर्तयतीति मयि दोषदृष्टिमकुर्वन्तः सन्तः इदं पूर्वोक्तश्लोकोक्तरीत्या कर्मानुष्ठानरूपं मे मतं नित्यमनुतिष्ठन्ति तेऽपि कर्मभिर्निर्वृत्तकर्मभिर्मुच्यन्ते, ज्ञानद्वारेति योज्यं ।किमुतापरोक्षज्ञानिनो मुच्यन्त इति कैमुत्यसूचनार्थोऽपिशब्दः ।एतत्सूचनं च प्रसङ्गिकं ध्येयम् ॥३.३१ ॥ये तु एतन्मे मतं अभ्यसूयन्तः कष्टं कर्मेति दोषदृष्टिमन्तः सन्तोनानुतिष्ठन्ति तानचेतसः विवेकशून्यान् अत एव ज्ञातव्यसर्वज्ञानविषये विमूढान् विशेषेण मिथ्याज्ञानिनः अत एव नष्टान् नरकाद्यनर्थभाजो विद्धि जानीहि ॥३.३२॥

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३.३३॥

यदि त्वन्मतानुष्टाने मोक्षः अन्यथा तु नाशः तर्हि ते मतं किमिति लोको नानुतिष्टतीत्यत आह ॥सदृशमिति ।प्रकृतिशब्दोऽत्रपूर्वसंस्कारार्थः सन् तत्कार्यरागद्वेषोपलक्षकः ।ज्ञानवानपि मन्मतकरणाकरणयोरिष्टानिष्ट ज्ञानवानपि ।स्वस्याः प्रकृतेः स्वकीयपूर्वसंस्कारकार्यरागद्वेषयोः सदृशमनुगुणमेव चेष्टते ।कर्म करोति ।किमुताज्ञ इत्यपेरर्थः ।ननु मनोनिग्रहे स्वभावानुगतचेष्टोपरतिः स्यादित्यत आह ॥प्रकृतिमिति ।प्रकृतिं स्वभावं यान्ति प्राणिनः ।तत्र मनोनिग्रहः किं करिष्यति न किमपीत्यर्थः ।तदुक्तं ।'बुध्वाऽप्यसौ यतो नित्यस्वभावानुगचेष्टितः ।स्वभावं यान्ति भूतानि निग्रहः किं करिष्यति' (प्रकाशसंहितायां) इति ।यद्वा मन्दान्न विचालयेदित्ययोग्येषु तत्त्वबोधो न कार्य इत्युक्तं, तत्कुत इत्यत आह ॥सदृशमिति ।प्रागिवार्थः ।तत्त्वोपदेशेनोत्पन्नज्ञानवानपि स्वभावानुगुणचेष्टावानेव भवति ।न तूपदेशजन्यज्ञानानुरूपचेष्टावानपि भवति ।अतस्तत्र तत्त्वोपदेशो व्यर्थ इति भावः ॥ ३.३३॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३.३४॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३.३५॥

यदि सर्वाणि भूतानि स्वभावानुगुणमेव चेष्टन्ते निग्रहोऽकिञ्चित्करः, तर्हि 'मयि सर्वाणि' इत्यत्रेतिकर्तव्यतापूर्वं कर्मविधानं 'ये मे मतं' इत्यादिना तस्य फलोक्तिश्च व्यर्थेत्यत आह ॥इन्द्रियस्येति ।जात्येकवचनम् ।इन्द्रियाणां चक्षुरादीनामर्थेषु रूपादिषु इन्द्रियाणां रागद्वेशौ अनुकूले रागः प्रतिकूले द्वेषश्चेत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ।लोभमोहमदमत्सराणामुपलक्षणम् ।प्राधान्याद्द्वयोरेवोक्तिः ।तदनुरूपा च प्राणिनां चेष्टेति निग्रहोऽकिञ्चित्करो यद्यपि, तथाऽपि तयो रागद्वेषयोः रागादिषड्वर्गवशं न गच्छेत् न प्राप्नुयात् ।कुतः ।हि यस्मादस्य श्रेयोऽर्थिनः तौ परिपन्थिनौ श्रेयोविघातकौ पापहेतू चात इत्यर्थः । निग्रहात्सद्यः फलाभावेऽप्यतिप्रयत्नवतो भवत्येव फलमिति भावः ।उक्तं हि 'संस्कारो बलवानेव' इत्यादि । एतच्च योग्यजनविषयं ध्येयम् ॥ ३.३४॥

'ज्यायसी चेत्' इत्यत्रार्जुनेन कर्मैव न कार्यम् ।तत्रापि नरकाद्यनर्थहेतुरागद्वेषोपेततया घोरं युद्धाख्यं कर्म तु नैव कार्यमिति कृताक्षेपद्वयमध्ये प्राथमिको 'लोकेऽस्मिन्' इत्यादिनोत्तरितः ।द्वितीयस्त्वधुना 'युध्यस्व विगतज्वरः' ।'तयोर्न वशमागच्छेत्' इत्याद्युक्त्या स्मारितः सन्परिह्रियते ॥श्रेयानिति ।स्वधर्मः स्ववर्णाश्रमोचितो धर्मः विगुणः अङ्गहीनोऽपि स्वनुष्ठितात् सर्वाङ्गसाकल्येन कृतात्परधर्मादन्यवर्णाश्र-

मोचितदर्मादपि श्रेयानधिकतरः ।कुतः स्वधर्मे युद्धादौ निधनमपि श्रेयः श्रेष्ठतरम् ।परधर्मः वर्णाश्रमान्तरधर्मस्तु भयावहः ।निषिद्धत्वात् अनर्थप्रापको यतोऽत इत्यर्थः ॥३.३५॥

अर्जुन उवाच

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३.३६॥

'तयोर्न वशमागच्छेत्' इत्यत्रातिप्रयत्नवतः पापहेत्वरिषड्वर्गजयश्शक्य इत्युक्तम् ।तेषु को बलवान्? तं महाप्रयत्नेन जेष्यामीति भावेन पृच्छति ॥अथेति ।'मयि सन्न्यस्य कर्माणि' इत्यादावुक्तसेतिकर्तव्यताककर्म-

कर्तव्यतारूपप्रकृतप्रमेयेपापहेतुप्रश्नोऽनुपयुक्तः ।तथाऽपि 'तयोर्न वशं' इत्यर्धे कामाद्यरिषड्वर्गस्य पापहेतुत्वोक्त्या स्मारितस्तेषु प्रबलपापहेतुप्रश्नोऽयं प्रासङ्गिक इति भावेन गीताकृता प्रकृतादर्थादर्थान्तर-

द्योतकोऽथशब्दः प्रयुक्तः ।यद्वा 'प्रकृतेः क्रियमाणानि' इत्यत्रेश्वरस्य सर्वप्रेरकत्वोक्त्या तत्प्रेरकत्वस्य पार्थस्य देवत्वेन देवानां प्रेरकत्वस्य च ज्ञाततया तत्र प्रश्नायोगात्, इन्द्रियस्येत्यत्र रागशब्दितकामा-

द्यरिषड्वर्गस्य प्रवर्तकत्वोक्त्या परमेश्वरात् देवजाताच्चाथानन्तरं कामादिषट्सु बलवत्प्रश्नोऽयमिति द्योतनादानन्तर्यवाच्ये वाऽयमथशब्दः ।तथा चायमर्थः ।अथ परमेश्वराद्देवेभ्यश्चानन्तरं अयं पुरुषः पापाचारमनिच्छन्नपि बलान्नियोजित इव पापं चरति ।स कामादिषु केन बलवता प्रयुक्तः प्रेरितश्चरति ।हे

वार्ष्णेय वृष्णिकुलोद्भवेति ॥ ३.३६ ॥

श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३.३७ ॥

काममूलत्वात्सर्वेषां स एव बलवानित्याह ॥काम एष इति ।एष त्वया पृष्टः पुरुषस्य पापेषु बलवान् प्रवर्तक इत्यनूद्य काम इति विधीयते ।एष कामः एष क्रोधः ।'कामात्क्रोधोऽभिजायत' (२.६२) इत्युक्तेः कामजत्वात्क्रोधस्य, कार्यकारणयो", 'गोभिः श्रीणीत मत्सरमि' त्यादाविवाभेदोपचारेणेयमुक्तिः ।स च क्रोधो रजोगुणात्समुद्भवतीति स तथा कामनिमित्तको रजोगुणपरिणाम इत्यर्थः ।क्रोध इत्युपलक्षणम् ।तथा च कामनिवृत्तौ तन्मूलाः क्रोधादयः पापहेतवो निवर्तितुं शक्यन्त इति कामनिवृत्तावेवातिप्रयत्नः कार्य इति भावः । कामस्य यावदपेक्षितं दत्वा जेतव्यः स इत्यतः कामं विशिनष्टि ।महाशनः महदशनं भोग्यं विषयो यस्य स तथा ।महान् पाप्मा पापं ब्रह्महत्यादिरूपं यस्मात्स तथा ।इह ऐहिकामुष्मिकपुरुषार्थविषये ।एनं कामं वैरिणं नित्यं अशुभेष्वेवप्रवर्तकतया मोक्षविरोधित्वात् शत्रुभूतं विद्धि जानीहि ।कामाभिमानी कालनेमिर्ज्ञेयः ॥३.३७

धूमेनाऽव्रियते वह्निर्यथाऽदर्शो मलेन च ।
यथोल्बेनाऽवृतो गर्भस्तथा तेनेदमावृतम् ॥ ३.३८ ॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३.३९ ॥

अशुभप्रेरकेषु क्रोधाद्यभिमान्यसुरेषु कामः कथं बलवानित्यत आह ॥धूमेनेत्यादिश्लोकद्वयेन ।वह्निर्यथा धूमेनाव्रियते तथा तेन कामेनेदं उत्तमजीवजातं किञ्चिदावृतम् ।यथा चादर्शो दर्पणो मलेनावृतः तथेदं मध्यमजीवजातं तेन कामेनाधिकमावृतम् ।यथा च गर्भः उल्बेन गर्भवेष्टनचर्मणाऽऽव्रियते आच्छाद्यते तथेदमधमजीवजातं तेन कामेनात्यन्तमावृतम् ।त्रिविधस्यापि जीवजातस्य यथायोग्यं यथावत्तया परावरतत्त्व-

ज्ञानप्रतिबन्धकः काम इत्यर्थः ।यद्वा इदमित्यनेनेश्वरान्तःकरणजीवाख्यं वस्तुत्रयं ग्राह्यम् ।वन्हिर्यथा धूमेनाव्रियते तथेश्वरो जीवगतकामेनावृतः ।प्रकाशरूपोऽप्यग्निर्धूमेनावृतोऽन्यैर्यथा न दृश्यते तथेश्वरः स्वयं सर्वं जानन्नपि नान्यैर्ज्ञायत इत्यर्थः ।आदर्शो मलेनेवान्तःकरणं कामेनावृतम् । यथाऽऽदर्शो मलेनावृतो मुखाद्यभिव्यक्तिहेतुर्न भवति, तथा जीवान्तःकरणं कामावृतं सदीश्वरं जीवं वा न प्रकाशयतीत्यर्थः ।यथोल्बेनावृतो गर्भः तथा कामेनावृतो जीवः, उल्बेन वेष्टितो गर्भो यथा व्यापाराक्षमस्तथा जीवोऽपि कामेनावृतो नेश्वरादिज्ञाने क्षम इत्यर्थः ॥ ३.३८ ॥

एवं ज्ञेयस्येश्वरादेः ज्ञानकारणस्य मनसः ज्ञातुर्जीवस्य प्रतिबन्धकः काम इत्युक्त्या ज्ञानोत्पत्तिप्रतिबन्धकत्वमुक्तम् । इदानीं शास्त्रतो जातमपि ज्ञानं स्वकार्यापरोक्षज्ञानाय न प्रभवतीत्याह ॥आवृतमिति ।ज्ञानिनः शास्त्रजनित-

ज्ञानिनोऽपि ज्ञानं कामावृतं भगवदपरोक्षज्ञानाय न प्रभवति ।किमु गुरुपदेशमात्रजज्ञानवत इति सूचनाय

ज्ञानिन इत्युक्तम् ।अन्यथा ज्ञानस्य ज्ञानिसम्बन्धाव्यभिचारात् ज्ञानिन इत्युक्तिर्व्यर्था स्यात् ।केनावृतं ज्ञानमित्यत उक्तम् ॥कामरूपेणेति ।रूप्यते निरूप्यतेऽनेनेति रूपमाख्या, काम इति रूपमाख्या यस्य तेन कामरूपेण कामाख्येन नित्यवैरिणा सदाऽपकारिणा दुष्पूरेण दुःखेन पूरयितव्येन ।न केवलं दुष्पूरः किं त्वनलेन न विद्यतेऽलं तृप्तिर्यस्य सोऽनलः ।तेन महतो भोगस्य विषयस्य प्राप्तावपि अधिकेच्छ्याऽलम्बुद्धिहीनेनेत्यर्थः ।३.३९॥

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥३.४०॥

यदर्थमर्जुनेन पापप्रवर्थकेषु बलवान्पृष्टः उत्तरितश्च तस्य बलवतः कामस्य शत्रोर्वधार्थमधिष्ठानमाह ॥इन्द्रियाणीति ।अस्य कामाख्यशत्रोरिन्द्रियाणि चक्षुरादीनि मनो बुद्धिश्चाधिष्ठानम् ।प्रधान्यज्ञापनाय मनोबुद्ध्योः पृथगुक्तिः ।अधिष्ठानतां व्यनक्ति ।एतैरिति ।एतैर्मनोबुद्धीन्द्रियैर्विषयसंसृष्टैरेष कामाख्यशत्रुर्ज्ञानमावृत्य ज्ञानजन्म प्रतिबध्येति वा, जातमपि ज्ञानं कार्ये क्षमं कृत्वेति वाऽर्थः ।देहिनं जीवं विमोहयति ॥३.४०॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥३.४१॥

हि यस्मात् हे भरतर्षभ त्वमिन्द्रियाण्यादौ नियम्य विषयसङ्गतान्यकृत्वा सङ्गतत्वे वा मनोबुद्ध्योर्विषय-

स्पर्शमकृत्वा तयोर्विषयसंस्पर्शेऽपि क्षोभमप्राप्येति वार्थः ।ज्ञानविज्ञानयोर्नाशनं यस्मात् पाप्मानं पापहेतुमेनं कामं प्रजहि हतं कुरु ।हृताधिष्ठानो हि शत्रुर्नाशयितुं शक्य इति प्रसिद्धद्योतको हि शब्दः । इन्द्रियजयः कामहननोपाय इति भावः ॥३.४१॥

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥३.४२॥

शत्रुहनने आयुधरूपं ज्ञानं 'एवं बुद्धेः' इत्युत्तरश्लोके वक्तुं ज्ञानविषयमाह ॥इन्द्रियाणीति ।शरीरादिन्द्रियाणि पराणि ।उत्कृष्टानीत्यर्थः ।इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः इत्यध्याहारेण योजना ध्येया । तथा 'यो बुद्धेः परतस्तु स' इत्यत्र बुद्धेरात्मा महान्परः ।महतः परमव्यक्तं योऽव्यक्तात्परतस्तु स इत्यपि ध्येयम् ।स परमात्मेत्यर्थः ।'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादिकाठकश्रुतेः (३.१०) ।अस्यार्थस्तु - 'देवेभ्य
इन्द्रियात्मभ्यो ज्यायांसोऽर्थाभिमानिनः ।सोमवित्तपसूर्याप्पाअस्व्यग्नीन्द्रेन्द्रसूनवः ॥यमो दक्षश्चेन्द्रियेशाः सौपर्णी वारुणी तथा ।उमेति चार्थमानिन्यस्तिस्रो द्विद्येकदेवताः ॥मनोऽभिमानिनो रुद्रवीन्द्रशेषास्त्रयोऽपि तु ।ते श्रेष्टा अर्थाभिमानिभ्यस्तेभ्यो बुद्धिः सरस्वती ।तस्या ब्रह्मा महानात्मा ततोऽव्यक्ताभिधा रमा ।तस्यास्तु पुरुषो विष्णुः पूर्णत्वान्नैव तत्समः ॥' इत्यादिकाठकभाष्यात्, तथा 'सर्वेभ्यः प्रवरा देवा' इत्यादितात्पर्यवाक्याच्चावसेयः ॥३.४२॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥३.४३॥

एवं तारतम्यान्तगतत्वेन ज्ञेयमुक्त्वा तज्ज्ञानमाह ॥एवमिति ।एवमुक्तदिशा बुद्धेर्महतोऽव्यक्ताच्च परं बुद्ध्वा आत्मानं मनः आत्मना बुद्ध्या संस्तभ्य निश्चलं कृत्वा दुरासदं दुःखेनासादनीयं निवर्तनीयमिति यावत् ।कामरूपं शत्रुं जहि हतं कुरु हे महाबाहो इति ॥३.४३॥

इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते

त्रितीयोऽध्यायः
